# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 6 | गुणाः – ५० |
| विषयः – स्वामिनारायणवेदान्तः (J) | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – शिक्षापत्री (अर्थदीपिकाटीकासहिता) | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ स्नानं सन्ध्यां च गायत्रीजपं श्रीविष्णुपूजनम्।
अकृत्वा वैश्वदेवं च कर्तव्यं नैव भोजनम्॥ श्लोकमिमं टीकानुसारं व्याख्यात।

२ प्राणापद्युपपन्नायां स्त्रीणां स्वेषां च वा क्वचित्।
तदा स्पृष्ट्वाऽपि तद्रक्षा कार्या सम्भाष्य ताश्च वा॥ इतीमं श्लोकं ग्रन्थोक्तदिशा व्याकुरुत।

३ नैष्ठिकव्रतवन्तो ये वर्णिनो मदुपाश्रयाः।
तैः स्पृश्या न स्त्रियो भाष्या न वीक्ष्याश्च ता धिया॥ श्लोकोऽयं ग्रन्थानुगुणं व्याख्येयः।

**प्रश्नः २ नैष्ठिकब्रह्मचारिणां विशेषधर्मान् यथाग्रन्थम् उल्लिखत।**

**प्रश्नः ३ द्विजस्य विशेषधर्माः ग्रन्थानुगुणं वर्णनीयाः।**

**प्रश्नः ४ कयोश्चिद् द्वयोः पद्ययोः व्याख्या कार्या।**

१ साधवो येऽथ तैः सर्वैर्नैष्ठिकब्रह्मचारिवत्।
स्त्रीस्त्रैणसङ्गादि वर्ज्यं जेतव्याश्चान्तरारयः॥

२ न च सङ्घं विना रात्रौ चलितव्यमनापदि।
एकाकिभिर्न गन्तव्यं तथा क्वापि विनापदम्॥

३ दिवास्वापो न कर्तव्यो रोगाद्यापदमन्तरा।
ग्राम्यवार्ता न कार्या च न श्रव्या बुद्धिपूर्वकम्॥

**प्रश्नः ५ साधूनां विशेषधर्मान् उपवर्णयत।**

**प्रश्नः ६ ब्रह्मचारिणां साधूनां च मिश्रधर्मान् यथाग्रन्थं निरूपयत।**

**प्रश्नः ७ कयोश्चिद् द्वयोः व्याख्यात्मकमुत्तरं प्रदेयम्।**

१ नेत्थं य आचरिष्यन्ति ते त्वस्मत्सम्प्रदायतः।
बहिर्भूता इति ज्ञेयं स्त्रीपुंसैः साम्प्रदायिकैः॥ श्लोकोऽयं टीकानुसारं व्याख्येयः।

२ वक्त्रभावे तु पूजैव कार्याऽस्याः प्रतिवासरम्।
मद्रूपमिति मद्वाणी मान्येयं परमादरात्॥ इतीमं श्लोकं यथाग्रन्थम् उपपादयत।

३ निजाश्रितानां सकलार्तिहन्ता सधर्मभक्तेरवनं विधाता।
दाता सुखानां मनसेप्सितानां तनोति कृष्णोऽखिलमङ्गलं नः॥ श्लोकमिमं ग्रन्थोक्तदिशा विवृणुत।

**प्रश्नः ८ धर्मोपदेशस्य उपसंहारं ग्रन्थानुसारं प्रतिपादयत।**

**प्रश्नः ९ शिक्षापत्र्यनुसारम् आचरणं कुर्वतामकुर्वतां च किं फलं भवति ? विवेचयत।**

**प्रश्नः १० दशानां प्रश्नानामुत्तरं लिखत।**

१ शिक्षापत्र्यां कति श्लोकाः सन्ति ?
२ नैष्ठिकब्रह्मचारिणां विशेषधर्माः कस्मात् श्लोकात् आरभ्यन्ते ?
३ कैः स्त्रियः न स्पृश्याः न भाष्याः न वीक्ष्याश्च ?
४ नैष्ठिकब्रह्मचारिभिः बुद्धिपूर्वकं किं न वीक्ष्यम् ?
५ वर्णिभिः स्वगुरोरपि कीदृशं वाक्यं न मान्यम् ?
६ ब्रह्मचर्यत्यागशब्देन विशेषतया किं विवक्षितम् ?
७ 'स्वातिनैकट्यम्' इति शब्दस्य कोऽर्थः ?
८ कैः आयुधं न धार्यम् ?
९ नैष्ठिकब्रह्मचारिभिः किमिन्द्रियं विशेषतया जेतव्यम् ?
१० ब्रह्मचारिभिः केषामभ्यासः कर्तव्यः ?
११ साधुभिः के जेतव्याः ?
१२ कैः सर्वेन्द्रियाणि जेयानि ?
१३ 'अनापदि' इति शब्दस्य कोऽर्थः ?
१४ भगवतः भक्तिं विना कैः व्यर्थः कालः न नेतव्यः ?
१५ नैष्ठिकब्रह्मचारिभिः साधुभिश्च सतामग्रतः कथं वर्तितव्यम् ?

****